# Shri Santadasa Ashtakam

# શ્રીસન્તદાસાષ્ટકમ્

## Document Information

Text title : Shri Santadasa Ashtakam

File name : santadAsAShTakam.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTaka

Location : doc_deities_misc

Author : Lakshmi Mishra

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

Shri Santadasa Ashtakam

# શ્રીસન્તદાસાષ્ટકમ્

(શ્રી લક્ષ્મીમિશ્રવિરચિતં)

શરદિન્દુ-કુન્દ-તુષાર-હાર-પવીર-પારદસુન્દરં
    જપ-માલિકા-મણિ-પદ્મપાણિમશેષલોકહિતૈષિણમ્ ।
કુલમૌલિમાદિગુરું જટામુકુટાદિભૂષણભૂષિતં
    પ્રણમામિ સમ્પ્રતિ "સન્તદાસ"મિહૈવ દર્શિતવિષ્ણુકમ્ ॥ ૧॥

શુમનિમ્બભાનુપથાનુગં હરિભક્તિપરાયણં શિવં
    બહુલાનુરાગનિવાસરાસવિલાસદર્શનરાગિણમ્ ।
રમણીય વેણુનિનાદ-વાદવિવાદ-સંશ્રવણે રુચિમ્,
    પ્રણમામિ સમ્પ્રતિ "સન્તદાસ"મિહૈવ દર્શિતવિષ્ણુકમ્ ॥ ૨॥

શિવબ્રહ્મવિષ્ણુપ્રપૂજકં નિજભક્તિરક્ષિતસાધકં
    નવસિદ્ધયોગીમુનીન્દ્રવન્દિતનિમ્બ ભાનુકુલોદ્ભવમ્ ।
કરુણાલયં હિ ઉદારતા કરશાન્તદાન્ત-સુમન્દિરં
    પ્રણમામિ સમ્પ્રતિ "સન્તદાસ"મિહૈવ દર્શિત વિષ્ણુવમ્ ॥ ૩॥

સકલાં વિહાય સ્વસમ્પદં મુરારિપાદસમાશ્રિતં
    જગતાં સ્વકીયવિશુદ્ધમાર્ગપ્રદર્શકં હરિસેવકમ્ ।
કલિકલ્મષઘ્નમશેષસદ્ગુણસાગરં નરનાગરં
    પ્રણમામિ સમ્પ્રતિ-"સન્તદાસ"મિહૈવ દર્શિત વિષ્ણુકમ્ ॥ ૪॥

સનકાદિકૈર્મુનિભિઃ પ્રદર્શિતપદ્ધતૌ પથિકં સ્થિરં
    જગતીતલૈક-સુવાટિકા હૃદિકઞ્જકુડ્મલષટપદમ્ ।
વૃષભાનુજાપ્રિયપદ્મરેણુસિતં હિતં સુલલાટકં
    પ્રણમામિ સમ્પ્રતિ "સન્તદાસ"મિહૈવ દર્શિતવિષ્ણુકમ્ ॥ ૫॥

યમુનાતરઙ્ગસમાકુલે પુલિને વિહારપરાયણં
    નિજધર્મકર્મપથે સ્થિતં પ્રથિતં વિચારપ્રવાહને ।
સતતં સુસેવિતસજ્જનં જનતાં સુધીર-પ્રચારકં

પ્રણમામિ સમ્પ્રતિ “સન્તદાસ”મિહૈવ દર્શિત વિષ્ણુકમ્ ॥ ૬॥

ગુરુપાદપદ્મરજઃકણૈર્વિમલીકૃતં સુલલાટકં
મુનિમણ્ડલીનદરાજહંસમસઙ્ખ્યશિષ્યસુસેવિતમ્ ।
હરિનામપાવનસાગરં બ્રજધૂલિભૂષણભૂષિતં
પ્રણમામિ સમ્પ્રતિ “સન્તદાસ”મિહૈવ દર્શિત વિષ્ણુકમ્ ॥ ૭॥

નિજસમ્પ્રદાયસમુન્નતૌ યતમાનમામરણં પરં
જગતીતલૈકસુધાકરં નિજભક્તજનૈક સુરક્ષકમ્ ।
કલિકલ્મષોત્કટતાપનં ભવસાગરાત્ પરિત્રાણદં
પ્રણમામિ સમ્પ્રતિ “સન્તદાસ”મિહૈવ દર્શિતવિષ્ણુકમ્ ॥ ૮॥

ભક્તિમાન્ યઃ પઠેન્નિત્યં સન્તદાસાષ્ટકં શુભમ્ ।
ઐહિકં હિ સુખં ભુક્ત્વાચાન્તે મોક્ષમવાપ્નુયાત્ ॥

ભક્તિદં વૈષ્ણવાણાં ચ મુમુક્ષૂણાં ચ મોક્ષદમ્ ।
સન્તદાસાષ્ટકં શ્રુત્વા નરઃ સદ્ગતિમાપ્નુયાત્ ॥

ઇતિ શ્રીલક્ષ્મીમિશ્રવિરચિતં શ્રીસન્તદાસાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Santadasa Ashtakam*
pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*